श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवेङ्कटाध्वरिणा विरचितं

# ॥ आचार्यपञ्चाशत् स्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ आचार्यपञ्चाशत् स्तोत्रम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

वेङ्कटनाथं देवं वेदान्तविहारिणं गुरुञ्च भजे।
शेषगिरिधुर्यमाद्यं यं विदुरन्यं त्वशेषगिरि धुर्यम्॥ १ ॥

श्रीमद्वेङ्कटनाथाख्यौ साधुचक्रमहादरौ।
परमानन्दनिलयौ प्रपद्ये देवदेशिकौ॥ २ ॥

त्रातुं स्वयं भुवं जातं त्रय्यन्ताख्यातगौरवम्।
शुभे भागवतं सन्तं स्तुहि देवं गुरुं च वाक्॥ ३ ॥

रसनां दुर्नरेशान वर्णनापङ्कदूषिताम्।
श्रुत्यन्तदेशिकोदन्त सुधाभिः शोधयाम्यहम्॥ ४ ॥

सन्तस्त्रय्यन्तसूरीन्द्रचरणद्वन्द्वचिन्तकाः।
आद्रियन्तामिदं स्तोत्रमन्तः सन्तमसच्छिदम्॥ ५ ॥

धनायावैयात्यप्रभवकुजनस्तोत्ररचना-
घनायासोद्विग्नः परिमुषिततापत्रयभयम्।
बुधामोदोत्पादक्षमनिगमचूडागुरुकथा-
सुधापाथोराशिं सुचिरमवगाहेऽहमधुना॥ ६ ॥

पुराऽकूपारक्ष्माधर ऋतुगणोद्यानपवन-
स्मरादिक्षोदीयोगुणकथननिर्विण्णरसनः।
निबध्नामि श्रीमन्निगममकुटार्यस्तवमिमं
क्षमन्तां धीमन्तः क्वचिदचतुरां वाचामपि मे॥ ७ ॥

क्व वाचामाचार्यः कविकथककण्ठीरवगुरुः
    क्व चाऽहं नीचात्मा त्रिचतुरवचः स्वप्यचतुरः।
निराकृत्य व्रीडां निपुणपरिहासोपजनितां
    तदीयस्तोत्रे मां तदपि किल भक्तिस्त्वरयति॥ ८ ॥

निषद्या विद्यानां निखिलकुमतिव्यालगरुडः
    सभा सौभाग्यानां सरसकवितापद्मसविता।
प्रमाणं भाष्यस्य प्रपदनकलाजन्मजलधिः
    करोतु क्षेमं नः कविकथककण्ठीरवगुरुः॥ ९ ॥

करौ बध्नन् भक्त्या कविकथकसिंहार्यगुरवे
    नमस्याः कुर्वेऽहं नतविततिमन्दारतरवे।
प्रबन्धास्त्रय्यन्तप्रचुरतरसौरभ्यजटिलाः
    प्रथन्ते यत्क्लृप्ताः प्रतिभटचपेटाहतिकृतः॥ १० ॥

प्रबन्धान् कर्तारः प्रतिजनपदं सन्ति बहवः
    त्रयीचूडाचार्यैः सह गणनमर्हन्ति न हि ते।
समन्ताज्जृम्भन्तां दिशि दिशि शकुन्ताः कृतरवाः
    प्रकल्पन्ते किं ते सरणिमनुसर्तुं खगपतेः॥ ११ ॥

प्रसादौजः कान्तिप्रभृतिगुणसङ्केतभवनं
    प्रगल्भं सन्दर्भं कविकथकसिंहार्यवचसाम्।
लिहानः कर्णाभ्यां मुहुरभिदुहानं शमरसं
    कविम्मन्यानन्यान् क इह बहु मन्येत रसिकः॥ १२ ॥

कवीनां सम्राजं कथकरथिकानामधिपतिं
    नमः कुर्मीकुर्मो निगममकुटीदेशिकममुम्।
सहस्रेण श्लोकैः सहृदयसुखैरेकनिशया
    मधुश्रीहृद्भिर्यो मधुरिपुपद त्रद्वयमसौत्॥ १३ ॥

यदेतत् त्रीन् वर्णानवति चतुरो वा यदपरं
    त्रयीशीर्षं प्राज्ञैस्तदुभयमविज्ञेयहृदयम्।

कलौ स्फूर्तिं नीतं कविकथकहर्यक्षगुरुणा
विना कस्तिग्मांशोर्नयनयुगलोद्भासनचणः॥ १४ ॥

यः स्वर्गान्तरसर्गकर्मणि महत्येकाननः पद्मभूः
अस्त्राचार्यकमर्कवंशपतिना छात्रेण यत्रार्पितम्।
तस्यैतस्य घने मुनेरभिजने तत्रावतीर्णात्मने
त्रय्यन्तैकधनाय विश्वगुरवे तस्मै परस्मै नमः॥ १५ ॥

यद्यत्रावजिगाहिषा यतिपतेः सिद्धान्तदुग्धामबुधा-
वुद्यद्दर्पकुदृष्टिसर्पदमने यद्यस्ति कौतूहलम्।
जिज्ञासा यदि वा रहस्यकृतिषु प्रज्ञाः कुरुध्वं तदा
त्रय्यन्तार्यपदारविन्दयुगळीपर्यन्तलग्नं मनः॥ १६ ॥

श्रीमान् वेदशिरोगुरुः प्रदिशतु श्रेयांसि भूयांसि मे
यस्य श्रीपतिभक्तिनर्तनकलारङ्गैस्तरङ्गैर्गिराम्।
वादायोधनवीरवारणघटासंहारसिंहारवैः
अस्ता नित्यगिरां ज्वरा भवसरिद्विस्तारनिस्तारकैः॥ १७ ॥

दद्यांदद्य कुदृष्टिसर्पगरुडस्त्रय्यन्तविद्यागुरुः
श्रीमान् वेङ्कटनाथदेशिकमणिः श्रेयांसि भूयांसि मे।
सान्द्राज्ञानमलीमसं मम चलं लीलालसं मानसं
निर्नेनेक्ति यदीयसूक्तिदिविषद् गङ्गातरङ्गावली॥ १८ ॥

ग्रथ्नन्तु प्रथिता बहूनि कवयो गद्यानि पद्यानि वा
श्रोत्रेषु श्रुतिमौलिदेशिकगुरो वर्षन्ति हर्षं सताम्।
भूयांसि व्रततीततिः प्रतिदिनं पुष्पाणि निष्पादय-
त्वामोदाभ्युदयं तथापि तनुते जातीव नातीव नः॥ १९ ॥

त्रय्यन्तार्यविबन्धनानि कतिचित् कव्यन्तरव्याहृतैः
साम्येन प्रतियन्तु मन्दमतयः किं तावता हीयते।
क्रीडत्कर्कटकीटकोटिनिबिडाद्वेशन्तकीलालतो
मण्डूकाः कलयन्ति किं न्वतिशयं वैकुण्ठपादोदके॥ २० ॥

जात्यन्धाः पदबन्धवर्त्मसु हठाद् द्वित्राक्षराद्गारिणो
निर्मात्रा निगमाञ्चलार्यकविना नित्यं प्रबन्धायुतम्।
स्पर्धां केचन वर्धयन्ति यदि तर्ह्यद्यापि खद्योतकः
कामं तिग्मरुचा कचाकचिरुचिं कस्मादिहोपेक्षते॥ २१ ॥

षट्सप्तानि निबन्धानि बहुभिः सम्पाद्य संवत्सरैः
दृप्ता ये कवयोऽत्र तेऽपि सुजनैः स्तोत्रस्य पात्रीकृताः।
निर्यत्नं तु निबन्धरत्नशतकं निर्माय धर्माय यो
निर्दर्पो निगमान्तदेशिकमणिर्न स्तौति कस्तं बुधः॥ २२ ॥

आचामीकरभूधरेन्द्रशिखरादाचापि लङ्कापुरात्
आचार्यानखिलान् प्रणम्य शुभया याचामि वाचाऽनया।
तत्तादृक्कवितासु तर्कसरणौ तन्त्रे तथान्ते श्रुतेः
दृष्टः किं सदृशागमान्तगुरुणा तथ्यं शपे कथ्यताम्॥ २३ ॥

कुमतिहृदयतापी कोऽपि वेदान्तसूरिः
दुरितरुचिपिशाचीं दूरमुच्चाटयेन्नः।
श्रुतिमधुरमहाध्वन्युन्मिषद्गौरवं यं
विदुरुचितमभिज्ञा विष्णुघण्टावतारम्॥ २४ ॥

परमतदुरहन्ताप्राप्तशास्त्रार्तिहन्ता
विकसितगुणभूमा वेदचूडार्यनामा।
विहरतु हृदि कश्चिद् विश्वमान्यो विपश्चिद्
विदितसकलमन्त्रः सर्वतन्त्रस्वतन्त्रः॥ २५ ॥

प्रकटितनिजपक्षप्रक्रियोदर्कतर्क-
प्रतिभटमकुटालीशाणसङ्घर्षशोणम्।
शरणवरणविद्याविश्रमोद्यानभूमेः
चरणयुगमुपासे चारु वेदान्तसूरेः॥ २६ ॥

दुरितमलिनमाद्यद्दुष्टमातङ्गभङ्गात्
इह निजपदभाजां दत्तमुक्तानुषङ्गः।

अधिकवनविहारी केसरी कश्चिदुच्चैः
    श्रुतियुगपरिपूर्तिं सौति गम्भीरशब्दैः॥ २७ ॥

वितरतु निजमाध्वीसारसारस्वतं मे
    विमतफणिनरेन्द्रो वेङ्कटेशः कवीन्द्रः।
समजनि निरवद्यैः सुन्दरैर्यस्य पद्यैः
    गलितकवनविद्या चण्डिमा डिण्डिमाख्यः॥ २८ ॥

जनयति निजशब्दैर्जिह्मगानां प्रकम्पं
    समुपगतसदध्वा वेङ्कटेशः कविर्यः।
अधिगतनिगमान्तं तं हरेः सन्निधानात्
    अमृतमुपनयन्तं जानते वैनतेयम्॥ २९ ॥

द्रमिडनिगमशाखाद्रष्टुरुच्चैर्महर्षेः
    चरणकमलसेवाचातुरीलब्धभूमा।
श्रितजनसुरशाखी श्रेयसे भूयसे नः
    कविकथकमृगेन्द्रः कल्पतेऽनल्पतेजाः॥ ३० ॥

प्रतिभटवादिकूटपरिपाटनकेलिपटुः
    घटयतु वेङ्कटेशकविराडभिरामपदम्।
यतिपतिपादयोगशुचिरत्र यदुक्ति नदी
    विषयनिषद्वरव्यक्तिकरं हरते भजताम्॥ ३१ ॥

मलयगुहाविहारिमरुदर्भकविभ्रमण-
    प्रणमितमाधवीप्रविलसन्मधुवेपथुकृत्।
रुजमधुना धुनातु मधुनाशनपादयुगी-
    सरसिजवासिता श्रुतिशिरोगुरुसूक्तिझरी॥ ३२ ॥

अकृतकभारतीशिखरदेशिकदिव्यवचः
    परिचयचातुरीपरिपचेळिमशेमुषिकाः।
चिरमुरगेशवैरितुरगे निहितात्मभरा
    विदधति दुर्मति प्रबलजिह्मगमर्मभिदाम्॥ ३३ ॥

स्थिरं किमपि वैभवं दिशति या मुकुन्दप्रिया
तदीयमपि वैभवं त्रिजगति प्रतिष्ठापयन्।
त्रयीमकुटदेशिकस्त्रुटितवैरिवाचाटको
ददाति भुवि संपदं तदपि निर्व्युदासं पदम्॥ ३४ ॥

नटन्मृडजटाच्छटालुठदमर्त्यलोकापगा-
तरङ्गमदभङ्गदा स्त्रिजगदामयच्छेदिनीः।
सुधा इव बुधादृताः सुरभिदुग्धसंस्पर्धिनीः
अनुश्रवशिरोगुरोरनुदिनं धयेयं गिरः॥ ३५ ॥

श्रुतिमकुटगुरूक्तिमौक्तिकानि
श्रुतिपुटयोर्दधतां सतां पुरस्तात्।
वयमपि कवयः स्म इत्यतोऽन्ये
वदितुमहो न सभासु किं त्रपन्ते॥ ३६ ॥

वेदान्तरङ्गचरविश्वजनभ्रुकंप-
पादान्तरङ्गनिगमान्तगुरूक्तिधाराम्।
वेदान्तरञ्जनकलाकुशला विगाह्य
वादान्तरं जहति नो भुवि वावदूकाः॥ ३७ ॥

आचार्यवर्यमविपल्लवमुल्लसन्तं
शाखाशताकलनपालितसद्द्विजेन्द्रम्।
उच्चैरनन्तगुरुनन्दनमुद्यतार्ति-
रामोदिनं कमपि कल्पकमाश्रयेऽहम्॥ ३८ ॥

रसने निपुणं भुजङ्गभङ्गे
विनतानन्दनमुत्तमं द्विजानाम्।
परमागममौलिदेशिकं तं
स्तुहि वैकुण्ठगतिप्रदस्वपक्षम्॥ ३९ ॥

कृतभारतिगौरवप्रतिष्ठं
कृतिनं लक्ष्मणदर्शनैकनिष्ठम्॥

परया तु कुदृष्टिभङ्गशक्त्या
निगमान्तार्यमवैमि रामचन्द्रम्॥ ४० ॥

त्रयीमपि द्राविडसंस्कृतात्मना
द्वयीं दशां प्राप्तवतीं प्रपञ्चयन्।
द्वयैकनिष्ठश्चतुराकृतीः कृतिं
करोत्यसङ्ख्यां कविवादिकेसरी॥ ४१ ॥

अर्वन्तमास्ये तमुपास्य देवं
गर्वन्तमोजं कुदृशां प्रशान्तम्।
कुर्वन्तमेनं गुरुमन्तरेण
गुर्वन्तरं कोऽत्र गुणी वृणीते॥ ४२ ॥

धरणिरमणे भिक्षाके वा धनेषु तृणेषु वा
निजगुणनुतौ निन्दायां वाऽबलासु शिलासु वा।
समदृशमिमं सत्त्वोद्रेकप्रसन्नधियं हरि-
प्रपदनधनं त्रय्यन्तार्यं भजे मम दैवतम्॥ ४३ ॥

विहरणगृहं विद्यादेव्या विरक्तिसरोजिनी-
विकसनरविर्जैत्रस्थानं विवेकमहीभुजः।
शमदमगुणप्राणत्राणं दयाभ्युदयालयं
रचयतु मुदं वेदान्तार्यो रहस्यकलानिधिः॥ ४४ ॥

प्रथितगरिमप्राचीनोक्तिप्रवर्तनवर्तनी-
प्रकटनपटुश्रीभाष्यार्थप्रकाशनदीपिका।
विहितदुरितच्छेदा वेदान्तदेशिकभारती
नवमरसदा नैषा केषां स्वदेत हृदे सताम्॥ ४५ ॥

वासुदेवकथनप्रियान् दया-
वासदेशहृदयान्नयाश्रयान्।
कौशिकान्वय भुवस्त्रयीशिरो-
देशिकान् वयमुपाश्रयामहे॥ ४६ ॥

स्वप्रकाशपरिभासिताखिलं
    तत्सुवर्णवरगोत्रसम्भवम्।
वेदमौलिगुरुरत्नमद्भुतं
    श्लाघते भुवि न कः परीक्षकः॥ ४७ ॥

भद्रा भद्राक्षराढ्या शमितविमतदुर्धीरवा धीरवाचां
    धारा धारायमाणा गिर इह हि सतां स्वादिमावादिमान्या।
कल्या कल्याणदाने श्रुतिशिखरगुरोरागता रागतापैः
    साकं सा कल्मषाणां गणमपनयतात् कारणाकारणानाम्॥ ४८ ॥

न्यञ्चद्वैरिञ्चिवाञ्चि प्रकटमृडमतप्रक्रियान्यक्रियाणि
    त्रुट्यद्भाट्टोक्तिकानि द्रुतकृतगुरुवाग्धोरणीवारणानि।
म्लायान् मायामतानि प्रतिहतसुगतव्याहतव्याहृतानि
    त्रय्यन्तार्योदितानि स्फुटनिगममतस्थापनानैपुणानि॥ ४९ ॥

अस्ता दुस्तार्किकोक्तिः सृतिरतिकृशताभागता सौगतानां
    शैवी सा वीतपुष्टिः सरणिरुपनमत्तानवा जैनवादाः।
अध्वा मध्वादिसृष्टो विगलति कुदृशां चुक्षुभे पक्षभेदैः
    निस्तन्द्रे देशिकेन्द्रे जयति यतिपतिप्रौढवागब्धिचन्द्रे॥ ५० ॥

अहं कुञ्जरपुञ्जभञ्जनसृणिः ज्ञानाग्निदिव्यारणिः
    सत्त्वस्थैरभिनन्दनीयसरणिः सर्वज्ञचूडामणिः।
अन्तर्ध्वान्तनितान्तकृन्तनरविर्दीप्ताग्निकल्पच्छविः
    दुर्वादिव्रजगर्वपर्वतपविः श्रीवेङ्कटेशः कविः॥ ५१ ॥

मोदाय वेदान्तगुरुः स भूयात्
    अध्यात्मविद्यामनघां गृहीतुम्।
गुरुं त्रिवंशोद्वहमत्रिवंशो
    द्वहं च रामानुजमाश्रयद्यः॥ ५२ ॥

आ सेतोर्विश्वजीवातोरा च गौरीगुरोर्गिरेः
इन्धे कविजनाऽहन्ताहन्ता वेदान्तदेशिकः॥ ५३ ॥

श्रीताताध्वरिसोदरीतनुभुवः श्रीश्रीनिवासेष्टिनो
    जातः श्रीरघुनाथदीक्षितकविर्जागर्ति यः कीर्तिमान्।
आत्रेयस्य सुतः स तस्य सुमतेराम्नायचूडागुरुं
    पद्यैरस्तुत वेङ्कटाध्वरिकविः पञ्चाशता मञ्जुभिः॥ ५४ ॥

वेदान्तार्यस्तवमुषसि ये विद्वदानन्दहेतुं
    पापठ्यन्ते पटुधिय इमं पावनानाममीषाम्।
राजीवाक्षो वसति हृदये तद्गृहा गेहभागे
    तद्भूपली वदननलिने तत्कलम्बस्तु दूरे॥ ५५ ॥

॥ इति आचार्यपञ्चाशत् स्तोत्रं सम्पूर्णम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥